# सुरभिः

(संस्कृतस्य पाठ्यपुस्तकम्)

**(कक्षा-सप्तमी)**



प्रकाशन विभाग

**डी.ए.वी. कॉलेज प्रबंधकर्त्री समिति**

चित्रगुप्त मार्ग, नई दिल्ली-110055

‘’

# अनुक्रमः


| क्र.सं. | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| | ईश्वर! तव महिमानं वन्दे। | 1 |
| प्रथमः पाठः | बुद्धिः एव अस्माकं बलम् | 2 |
| | [व्याकरणकार्यम्-धातुरूपाणां प्रयोगः (लट्-लङ्-लृट्लकाराः)] | 9 |
| द्वितीयः पाठः | अभ्यासः एव परमो गुरुः | 12 |
| | (व्याकरणकार्यम्-अव्ययपदानि, उपसर्गाः च) | 17 |
| तृतीयः पाठः | उपकारकाः वृक्षाः | 21 |
| | (व्याकरणकार्यम्-‘क्त्वा’ प्रत्ययः) | 25 |
| चतुर्थः पाठः | आगच्छ! भोजनं कुर्याम | 29 |
| | (व्याकरणकार्यम्-लोट् लकारः) | 34 |
| पञ्चमः पाठः | सुवचनानि | 37 |
| | (व्याकरणकार्यम्-शब्दरूपाणां प्रयोगः) | 43 |
| षष्ठः पाठः | यस्य बुद्धिः तस्य बलम् | 46 |
| | (व्याकरणकार्यम्-‘तुमुन्’ प्रत्ययः) | 52 |
| सप्तमः पाठः | बुद्धिः एव उत्तमा | 55 |
| | (व्याकरणकार्यम्-विशेषणं विशेष्यम् च) | 59 |
| अष्टमः पाठः | अविवेकः परमापदां पदम् | 62 |
| | [व्याकरणकार्यम्-विशेषण-विशेष्यपदानि (सर्वनाम-पदानि), अस्मद्-युष्मद्-सर्वनाम-प्रयोगः] | 69 |
| नवमः पाठः | बुद्धिमान् गोपालकः | 72 |
| | (व्याकरणकार्यम्-उपपदविभक्तिः) | 77 |
| दशमः पाठः | मधुरवचनानि | 79 |
| | (व्याकरणकार्यम्-सङ्ख्याप्रयोगः, सन्धिः) | 84 |
| | (पत्र-लेखनम्, चित्र-वर्णनम् च) | 89 |

# ईश्वर! तव महिमानं वन्दे।

ईश्वर! तव महिमानं वन्दे
ईश्वर! तव महिमानं वन्दे।।

निगम-गीत-गुणगानं वन्दे,
परितो वितत-वितानं वन्दे।।
शोभा-शक्ति-निधानं वन्दे,
ईश्वर! तव महिमानं वन्दे।।

नव-लतिकासु लसन्तं वन्दे,
नव-**सुमेषु** विकसन्तं वन्दे।।
शिशु-वदनेषु हसन्तं वन्दे,
ईश्वर! तव महिमानं वन्दे।।

मन्दिर-मस्जिद-वासं वन्दे,
गिरिजाभवन-निवासं वन्दे।।
कण-कण-कलित-प्रकाशं वन्दे,
ईश्वर! तव महिमानं वन्दे।।





**निर्देश:-** एतत् गीतं प्रार्थनारूपेण सामूहिक-गायनाय अस्ति।

## शब्दार्थाः Word-Meaning

**सुमेषु** – फूलों में (in flowers)

# बुद्धिः एव अस्माकं बलम्

प्रथमः पाठः

**कश्चित्** बलवान् सिंहः आसीत्।






सः वनस्य राजा आसीत्।



सर्वे पशवः सिंहात् **भीताः** आसन्।



सिंहः प्रतिदिनं पशून् मारयति स्म।

पशूनाम् सङ्ख्या **न्यूनतरा** अभवत्।

## शब्दार्थाः : Word-Meaning

**कश्चित्** – कोई (any body) **भीताः** – डरे हुए (scared) **न्यूनतरा** – पहले से कम (less than before)



सिंहात् भीताः पशवः **गुहासु** वसन्ति स्म।



एकदा सिंहः **बुभुक्षितः** आसीत्।



इतस्ततः भ्रमन् सः एकां **गुहाम्** अपश्यत्। सः अचिन्तयत्–अत्र अवश्यम् एव पशुः भविष्यति। अहं तम् खादित्वा तृप्तः भविष्यामि। एवम् एषा गुहा अपि मम भविष्यति।

## शब्दार्थाः Word-Meaning

**बुभुक्षितः** – भूखा (hungry) | **गुहासु** – गुफ़ाओं में (in caves) | **गुहाम्** – गुफ़ा को (cave)

परं गुहायाः स्वामी एकः शृगालः आसीत्। सः अतीव बुद्धिमान् आसीत्। सायङ्काले यदा सः गुहां प्रति आगच्छत् तदा मार्गे सः सिंहस्य चरण-चिह्नानि अपश्यत्।





शृगालः अचिन्तयत्—सिंहः तु अवश्यम् एव गुहायाः **अभ्यन्तरं** भवेत्। तदा किं करणीयम्? इति विचार्य सः एकम् उपायम् अचिन्तयत्।



गुहायाः समीपं गत्वा सः शृगालः उच्चैः अवदत्—अयि गुहे! अहम् आगच्छम्, प्रतिदिनम् इव कथय— सर्वत्र कुशलम् अस्ति न वा?

## शब्दार्थाः : Word-Meaning

- **अभ्यन्तरं** – अन्दर (inside)


सिंहः अचिन्तयत्— यदि अहम् उत्तरं न दास्यामि तदा तु शृगालः गमिष्यति। अतः सः अकथयत्–आगच्छ। अत्र सर्वम् कुशलम् अस्ति।





शृगालः सत्यं ज्ञात्वा तत्क्षणम् एव अधावत्।

किञ्चित् कालं प्रतीक्षां कृत्वा सिंहः गुहायाः बहिः आगच्छत्।





तदा इतस्ततः पश्यन् सिंहः पश्चात्तापं कृत्वा बुभुक्षितः एव अतिष्ठत्।

उचितम् एव कथितम्–सर्वाणि कार्याणि बुद्ध्या एव सिध्यन्ति। अतः **बुद्धिः एव अस्माकम् बलम् अस्ति।**

## अभ्यासः

1. **पाठं पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'नहि'–**
    - (i) सिंहः वनस्य राजा आसीत्। ----------------------------
    - (ii) पशवः सिंहात् भीताः न आसन्। ----------------------------
    - (iii) सिंहः पशून् मारयति स्म। ----------------------------
    - (iv) सिंहः बुभुक्षितः न आसीत्। ----------------------------
    - (v) गुहायाः स्वामी एकः शृगालः आसीत्। ----------------------------
    - (vi) शृगालः मार्गे सिंहस्य चरण-चिह्नम् न अपश्यत्। ----------------------------

2. **उचितपदेन रिक्तस्थानं पूरयन्तु–**
    - (i) ---------------------------- पशून् मारयति। (सिंहः/शृगालः)
    - (ii) ---------------------------- बलवान् आसीत्। (शृगालः/सिंहः)
    - (iii) ---------------------------- भीताः आसन्। (पशवः/सिंहाः)
    - (iv) ---------------------------- बुभुक्षितः आसीत्। (सिंहः/शृगालः)
    - (v) ---------------------------- बुद्धिमान् आसीत्। (सिंहः/शृगालः)



3. **विशेषणं विशेष्येण सह योजयन्तु–**

| | |
|---|---|
| (i) भीताः | सिंहः |
| (ii) बुद्धिमान् | गुहाम् |
| (iii) बलवान् | पशवः |
| (iv) न्यूनतरा | सङ्ख्या |
| (v) एकाम् | शृगालः |



4. **एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**
    - (i) कः वनस्य राजा आसीत्? ------------------------------------------
    - (ii) पशवः कस्मात् भीताः आसन्? ------------------------------------------
    - (iii) सिंहः कान् मारयति स्म? ------------------------------------------
    - (iv) पशवः कुत्र वसन्ति स्म? ------------------------------------------
    - (v) कः बुभुक्षितः आसीत्? ------------------------------------------

**5. एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) केषाम् सङ्ख्या न्यूनतरा अभवत्?

-----------------------------------------------------------------------------------------------------------

(ii) श्रृगालः मार्गे किम् अपश्यत्?

-----------------------------------------------------------------------------------------------------------

(iii) गुहायाः समीपं गत्वा श्रृगालः किम् अवदत्?

-----------------------------------------------------------------------------------------------------------

(iv) सत्यं ज्ञात्वा श्रृगालः किम् अकरोत्?

-----------------------------------------------------------------------------------------------------------

(v) कः पश्चात्तापम् अकरोत्?

-----------------------------------------------------------------------------------------------------------

**6. स्थूलपदस्य स्थाने समुचितं प्रश्नवाचकपदं चित्वा प्रश्ननिर्माणं कुर्वन्तु–**

(i) **सिंहः** बलवान् आसीत्।

-------------------------------------- (कौ/कः/के)

(ii) पशवः **सिंहात्** भीताः आसन्।

-------------------------------------- (कस्याः/कस्मात्/केभ्यः)

(iii) **पशवः** गुहासु वसन्ति स्म।

-------------------------------------- (के/काः/कः)

(iv) **सिंहः** गुहायाः समीपम् आगच्छत्।

-------------------------------------- (कः/का/के)

(v) **पशूनाम्** सङ्ख्या न्यूनतरा अभवत्।

-------------------------------------- (केषाम्/कस्य/कासाम्)

(vi) **श्रृगालः** उच्चैः अवदत्।

-------------------------------------- (का/कः/के)

7. **अधोलिखितवाक्यानि कथाक्रमानुसारेण लिखन्तु–**

(i) सिंहः वनस्य राजा आसीत्।

(ii) भीताः पशवः गुहासु वसन्ति स्म।

(iii) एकदा सिंहः बुभुक्षितः आसीत्।

(iv) सिंहः पशून् मारयति स्म।

(v) सः गुहायाः समीपम् आगच्छत्।

(i) ------------------------------------------------------------------------------------------------।

(ii) ------------------------------------------------------------------------------------------------।

(iii) ------------------------------------------------------------------------------------------------।

(iv) ------------------------------------------------------------------------------------------------।

(v) ------------------------------------------------------------------------------------------------।

## ■ मूल्यात्मकः प्रश्नः

**भवन्तः पाठे अपठन् यत् एकः शृगालः सिंहात् स्वप्राणान् अरक्षत्। वदन्तु सः कथम् स्वप्राणान् अरक्षत्–बलस्य प्रयोगं कृत्वा, बुद्धेः प्रयोगं कृत्वा अथवा मित्राणाम् सहायतया।**

## ■ गतिविधिः

**'बुद्धिः एव उत्तमा' इति विषयम् अधिकृत्य पुस्तिकायाम् एकाम् अन्यां कथां लिखन्तु।**

## व्याकरणम्

# धातुरूपाणां प्रयोगः

■ **ध्यानेन पठन्तु अवगच्छन्तु च–**

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमः** | बालः पठति | बालौ पठतः | बालाः पठन्ति |
| | सः/सा पठति | तौ/ते पठतः | ते/ताः पठन्ति |
| **मध्यमः** | त्वम् पठसि | युवाम् पठथः | यूयम् पठथ |
| **उत्तमः** | अहम् पठामि | आवाम् पठावः | वयम् पठामः |

## अभ्यासः

**1. उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयन्तु–**

| | | |
|---|---|---|
| सः पठति। | तौ पठतः। | ते पठन्ति। |
| अहम् --------------------। | आवाम् पठावः। | वयम् ------------------------। |
| बालिका नृत्यति। | बालिके --------------------। | बालिकाः --------------------। |
| त्वम् ---------------------। | युवाम् ---------------------। | यूयम् धावथ। |
| जनः भ्रमति। | जनौ -----------------------। | जनाः -----------------------। |
| गजः ---------------------। | गजौ चलत। | गजाः -----------------------। |
| चटका -------------------। | चटके ---------------------। | चटकाः कूजन्ति। |
| त्वम् कीडसि। | युवाम् ---------------------। | यूयम् -----------------------। |

**2. अधोलिखित-वाक्यानि उचितधातुरूपैः पूरयन्तु–**

(i) सिंहः ----गर्जति----------------। (गर्जति/गर्जन्ति)

(ii) वयम् --------------------------। (लिखथ/लिखामः)

(iii) तौ कौ -----------------------? (अस्ति/स्तः)

(iv) लते ----------------------------। (नमतः/नमथ)

(v) छात्रौ ----------------------------। (लिखति/लिखतः)

(vi) युवाम् ----------------------------। (पश्यथः/पश्यावः)

**3. उदाहरणानुसारं वाक्यानि पूरयन्तु–**

| **लट्लकारः** | **लङ्लकारः** |
| --- | --- |
| (i) सः पुस्तकं पठति। | सः पुस्तकम् अपठत्। |
| (ii) त्वम् गच्छसि। | त्वम् ----------------------। |
| (iii) अहं ----------------------। | अहम् अचलम्। |
| (iv) ते बालिके ----------------। | ते बालिके अगच्छताम्। |
| (v) यूयं नमथ। | यूयम् ------------------------। |

**4. निम्नलिखितानि वाक्यानि लङ्लकारे परिवर्तयन्तु–**

| **लट्लकारे (वर्तमानकाले)** | **लङ्लकारे (भूतकाले)** |
| --- | --- |
| (i) तौ पठतः। | तौ अपठताम्। |
| (ii) ते चलन्ति। | ---------------------------। |
| (iii) ताः लिखन्ति। | ---------------------------। |
| (iv) सा गच्छति। | ---------------------------। |
| (v) त्वं नमसि। | ---------------------------। |
| (vi) अहं भ्रमामि। | ---------------------------। |
| (vii) युवां नमथः। | ---------------------------। |
| (viii) आवां धावामः। | ---------------------------। |
| (ix) यूयम् वदथ। | ---------------------------। |
| (x) वयं चलामः। | ---------------------------। |

**ध्यातव्यम्**

वर्तमानकालस्य अर्थात् लट्लकारस्य रूपेभ्यः परं यदि 'स्म' इति अव्ययपदं युज्यते, तदा भूतकालस्य भावः प्रकाशयितुं शक्यते। यथा- 'पठति' इति स्थाने 'पठति स्म' इति भवति। यथा–

| लट्लकारे | भूतकाले ('स्म' अव्ययप्रयोगे) | लङ्लकारे |
|---|---|---|
| सः पठति। | सः पठति स्म। | सः अपठत्। |
| बालौ क्रीडतः। | बालौ क्रीडतः स्म। | बालौ अक्रीडताम्। |
| अहं भ्रमामि। | अहं भ्रमामि स्म। | अहम् अभ्रमम्। |
| त्वं गच्छसि । | त्वं गच्छसि स्म। | त्वम् अगच्छः। |

**5. निम्नलिखितानि वाक्यानि 'स्म' इति अव्ययपदस्य प्रयोगेण भूतकाले परिवर्तयन्तु–**

| लट्लकारे | भूतकाले |
|---|---|
| (i) सिंहः गर्जति। | सिंहः गर्जति स्म। |
| (ii) शुकौ वदतः। | ------------------------। |
| (iii) त्वम् धावसि। | ------------------------। |
| (iv) आवाम् चलावः। | ------------------------। |
| (v) यूयं गच्छथ। | ------------------------। |
| (vi) वयं नमामः। | ------------------------। |

**6. निम्नलिखितानि वाक्यानि लृट्लकारे परिवर्तयन्तु–**

(i) त्वं खेलसि। ------------ त्वं खेलिष्यसि।

(ii) गजाः चलन्ति। ------------।

(iii) युवां पठथः। ------------।

(iv) ताः नमन्ति। ------------।


(v) छात्रौ पठतः। ------------।

(vi) त्वं लिखसि। ------------।

******

# अभ्यास एव परमो गुरुः

द्वितीयः पाठः



कश्चित् बालः आसीत्। सः बङ्गप्रदेशे एकस्मिन् विद्यालये पठति स्म। सः अतीव जिज्ञासुः आसीत्।

परन्तु सः पठने कुशलः न आसीत्। सः यत् पठति तत् **विस्मरति स्म**। सहपाठिनः तस्य उपहासं कुर्वन्ति स्म। सः चिन्तयति– किम् अहं मूर्खः अस्मि? किं मम भाग्ये विद्या न अस्ति? परन्तु अहं तु पठितुम् इच्छामि। तदा किं कर्तव्यम्? एकदा सः मार्गे एकं कूपम् अपश्यत्। कूपस्य उपरि एकः घटः आसीत्। सः घटस्य अधः एकं **गर्तम्** अपश्यत्। सः अचिन्तयत्– इमं सुन्दरं गर्तं कः **निर्मितवान्**? सः मातरम् अपृच्छत्– मातः! अहं कूपे घटस्य **अधः** एकं गर्तम् अपश्यम्। तं गर्तम् कः निर्मितवान्? माता अवदत्– पुत्र! प्रतिदिनं **भूयो भूयः घट-स्थापनेन** सः गर्तः निर्मितः।

सः बालः विचारमग्नः अभवत्। सः अचिन्तयत् यदि भूयो भूयः घटस्थापनेन **पाषाणशिलायां** गर्तः अभवत् तदा किं पुनः पुनः पठनेन मम मतिः तीव्रा न भविष्यति? इति विचार्य सः विद्याभ्यासे संलग्नः अभवत्। सः पुनः पुनः पाठान् अपठत्। पुनः पुनः लेखनस्य अपि अभ्यासम् अकरोत्। शनैः शनैः सः बुद्धिमान् अभवत्। सः परीक्षायां विशिष्टं स्थानं प्राप्तवान्। अधुना तस्य सहपाठिनः तस्य उपहासं न कुर्वन्ति स्म अपितु आदरं कुर्वन्ति स्म।

सत्यम् एव अस्ति– '**अभ्यास एव अस्ति परमो गुरुः।**'

## शब्दार्थाः Word-Meaning

**विस्मरति स्म** – भूलता था (used to forget) | **गर्तम्** – गड्ढा (pothole) | **निर्मितवान्** – बनाया (made) | **अधः** – नीचे (under) | **भूयो भूयः** – बार-बार (again and again) | **घट-स्थापनेन** – घड़ा रखने से (on keeping the pot) | **पाषाणशिलायाम्** – पत्थर की शिला पर (on the stone)

## अभ्यास:

1. **पाठं पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'नहि'–**

(i) किं छात्रः पठने अकुशलः आसीत्? ---------------आम्---------------

(ii) किं छात्रस्य उपहासम् अध्यापकाः कुर्वन्ति स्म? ---------------नहि---------------

(iii) किं गर्तः घटस्य अधः आसीत्? --------------------------------

(iv) किं गर्तः घटस्थापनेन अभवत्? --------------------------------

(v) किं बालकः उपहासेन दुःखी आसीत्? --------------------------------

(vi) किं बालकः पठितुं न इच्छति स्म? --------------------------------

(vii) किं छात्रः परीक्षायाम् सफलः अभवत्? --------------------------------

(viii) किम् अभ्यासः परमो गुरुः? --------------------------------

2. **चित्रं दृष्ट्वा पाठात् उपयुक्त-पदानि चित्वा चित्राणाम् अधः लिखन्तु–**



सः पुनः -------------------- अपठत्।



सहपाठिनः -------------------- कुर्वन्ति स्म।



सः घटस्य -------------------- अपश्यत्।



पुनः पुनः -------------------- अकरोत्।

**3. उचितं विपरीतपदं चित्वा लिखन्तु–**

(i) कुशलः ----------------------------------

(ii) विस्मरति ----------------------------------

(iii) मूर्खः ----------------------------------

(iv) अधः ----------------------------------

(v) आदरं ----------------------------------

स्मरति
अनादरं
उपरि
बुद्धिमान्
अकुशलः

**4. एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) छात्रः कस्मिन् अकुशलः आसीत्? ----------------------------------

(ii) बालकस्य उपहासं के कुर्वन्ति स्म? ----------------------------------

(iii) बालकः परीक्षायां कीदृशं स्थानं प्राप्तवान्? ----------------------------------

(iv) बालकः मार्गे किम् अपश्यत्? ----------------------------------

(v) घटस्य अधः किम् आसीत्? ----------------------------------

(vi) परमः गुरुः कः अस्ति? ----------------------------------

**5. एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) विद्यालये कीदृशः छात्रः आसीत्?

----------------------------------------------------------------------------------------------------

(ii) उपहासकारणात् छात्रः किं चिन्तयति स्म?

----------------------------------------------------------------------------------------------------

(iii) गर्तं दृष्ट्वा छात्रः किम् अचिन्तयत्?

----------------------------------------------------------------------------------------------------

(iv) माता किम् उत्तरम् अयच्छत्?

----------------------------------------------------------------------------------------------------

(v) मातुः उत्तरम् श्रुत्वा छात्रः किम् अचिन्तयत्?

----------------------------------------------------------------------------------------------------

**6. स्थूलपदस्य स्थाने समुचितं प्रश्नवाचकं पदं चित्वा प्रश्ननिर्माणं कुर्वन्तु–**

(i) **छात्रः** मूर्खः आसीत्।

-------------------------------------------------------------------------------? (कः/किम्/का)

(ii) छात्रः **कूपम्** अपश्यत्।

-------------------------------------------------------------------------------? (कम्/कः/केन)

(iii) छात्रः **मातरम्** अपृच्छत्।

-------------------------------------------------------------------------------? (कस्य/काम्/किम्)

(iv) **घटस्य** अधः एकः गर्तः आसीत्।

-------------------------------------------------------------------------------? (कस्मिन्/किम्/कस्य)

(v) **उपहासकारणात्** छात्रः दुःखी आसीत्।

-------------------------------------------------------------------------------? (कस्मात्/कस्य/कम्)

(vi) **बालकः** विचारमग्नः अभवत्।

-------------------------------------------------------------------------------? (कः/कौ/केन)

**7. अधोलिखितवाक्यानि कथाक्रमानुसारेण लिखन्तु–**

(i) एकदा सः मार्गे कूपस्य समीपे एकं गर्तम् अपश्यत्।

(ii) सः यत् पठति तत् विस्मरति स्म।

(iii) एवमेव पुनः पुनः पठनेन तस्य मतिः तीव्रा भवति।

(iv) बङ्गप्रदेशे एकः पठने अकुशलः छात्रः आसीत्।

(v) गर्तः प्रतिदिनं घटस्थापनेन निर्मितः अभवत्।

(i) ------------------------------------------------------------------------------------------------------------।

(ii) ------------------------------------------------------------------------------------------------------------।

(iii) ------------------------------------------------------------------------------------------------------------।

(iv) ------------------------------------------------------------------------------------------------------------।

(v) ------------------------------------------------------------------------------------------------------------।

## मूल्यात्मकः प्रश्नः

भवन्तः पाठे अपठन् यत् पठने अकुशलः एकः बालकः पुनः पुनः पठनेन लेखनस्य च अभ्यासेन बुद्धिमान् अभवत् परीक्षायां च विशिष्टं स्थानम् अलभत। अधुना विचारयन्तु लिखन्तु च भवान्/भवती योग्यतां प्राप्तुं किं किं करोति?

## गतिविधिः

'अभ्यासस्य महत्त्वम्' इति विषयम् अधिकृत्य सूक्तीनां सङ्कलनं कृत्वा लिखन्तु–

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

## व्याकरणम्

### अव्ययपदानि

■ अस्मिन् पाठे आगतान् निम्नलिखितान् शब्दान् पश्यन्तु पठन्तु च। उदाहरणानुसारं च रिक्तस्थानेषु लिखन्तु। एतेषाम् अर्थाः अपि दत्ताः–

| | | | | | |
|---|---|---|---|---|---|
| अतीव | ------अतीव------ | excessive | तदा | ------------------------ | then |
| न | ---------न--------- | not | पुनः पुनः | ------------------------ | again and again |
| परन्तु | ------------------ | but | अपि | ------------------------ | also |
| एकदा | ------------------ | once | शनैः शनैः | ------------------------ | slowly-slowly |
| अधः | ------------------ | under | अधुना | ------------------------ | now |
| यदि | ------------------ | if | अपितु | ------------------------ | but |
| भूयो भूयः | ------------------ | again and again | एव | ------------------------ | only |

■ एतानि पदानि अव्ययपदानि कथ्यन्ते। एतेषां भिन्न-भिन्न रूपाणि न भवन्ति। एतानि विभिन्न-विभक्तिषु, वचनेषु, लिङ्गेषु, पुरुषेषु, कालेषु च सर्वदा समानानि एव भवन्ति। एतादृशानि अनेकानि पदानि सन्ति। कानिचित् अत्र लिखितानि सन्ति। पठन्तु लिखन्तु च–

| | | | | | |
|---|---|---|---|---|---|
| अत्र | ------------------------ | here | किमर्थम् | ------------------------ | why |
| तत्र | ------------------------ | there | च | ------------------------ | and |
| यत्र | ------------------------ | where | कथम् | ------------------------ | how |
| कुत्र | ------------------------ | where | अद्य | ------------------------ | today |
| यदा | ------------------------ | when | श्वः | ------------------------ | tomorrow |
| तदा | ------------------------ | then | ह्यः | ------------------------ | yesterday |
| कदा | ------------------------ | when | | | |

## अभ्यासः

**1. वाक्यानि रचयन्तु वदन्तु च–**

| | | |
|---|---|---|
| ते/ताः | अपि | पठन्ति |
| त्वम् | कदा | पठसि |
| अहम् | कुत्र | पठामि |
| सः/सा | कथम् | पठति |
| यूयम् | किमर्थम् | पठथ |

(i) ताः अपि पठन्ति।

(ii) ----------

(iii) ----------

(iv) ----------

(v) ----------

(vi) ----------

(vii) ----------

**2. मञ्जूषातः उचितानि अव्ययपदानि चित्वा रिक्तस्थानानि पूरयन्तु–**

(i) ---------- ते जन्तुशालाम् अगच्छन्।

(ii) कच्छपः ---------- चलति।

(iii) लोके सत्यम् ---------- जयते।

(iv) बालः ---------- पठनस्य अभ्यासम् अकरोत्।

(v) ---------- मम परीक्षा भविष्यति।

(vi) ---------- वर्षा भवति ---------- मयूरः नृत्यति।

(vii) रामेण सह सीता ---------- वनम् अगच्छत्।

(viii) ---------- एकम् उद्यानम् आसीत्।

(ix) ---------- यूयं पाठं स्मरत।

(x) त्वम् ---------- पठसि?

पुनः पुनः
श्वः
यदा
तदा
एव
कदा
अत्र
एकदा
अधुना
शनैः शनैः
अपि

# उपसर्गाः

## पठन्तु अवगच्छन्तु च–

विस्मरति (वि– स्मरति)

उपहासम् (उप– हासम्)

निर्मितवान् (निर्– मितवान्)

आगत्य (आ– गत्य)

विचार्य (वि– चार्य)

प्रतिदिनं (प्रति– दिनं)

प्राप्तवान् (प्र– आप्तवान्)

- अत्र वि, उप, निर्, आ, प्रति, प्र इत्यादयः शब्दांशाः **'उपसर्गाः' इति कथ्यन्ते। एतेषाम् प्रयोगः पदानाम्** प्रारम्भे भवति। उपसर्गाणां प्रयोगेण शब्दानां प्रायः अर्थपरिवर्तनं भवति।
- अन्ये अपि उपसर्गाः सन्ति– परा, अप, सम्, अनु, अव, दुस्, दुर्, निस्, नि, अधि, अपि, सु, अभि, अति, परि, उत्

## ध्यानेन पठन्तु अवगच्छन्तु च–

(i) सः कार्यं करोति।
वानरः अनुकरोति।
सज्जनः प्राणिनः उपकरोति।

(ii) सः गृहं गच्छति।
लता गृहात् आगच्छति।
सा मातरम् अनुगच्छति।

(iii) सत्सङ्गतिः उन्नतिं दिशति।
गुरुः शिष्यान् उपदिशति।
सः बालान् आदिशति।

(iv) सत्सङ्गतिः धियः जाड्यं हरति।
नृपः उद्याने विहरति।
सैनिकः चौरं प्रहरति।

## अभ्यासः

1. **अधोलिखित–वाक्येषु उपसर्गयुक्तपदानि रेखाङ्कितानि कुर्वन्तु उपसर्गान् च पृथक् कृत्वा लिखन्तु–**

(i) खगाः आकाशे विचरन्ति। (उत्पतन्ति)

----------------------------------------------------------------

(ii) वानरः वृक्षम् आरोहति।

----------------------------------------------------------------

(iii) सा नद्याः जलम् आनयति।

----------------------------------------------------------------

(iv) सः सर्वम् अवगच्छति।

----------------------------------------------------------------

(v) सज्जनः सदैव प्रसन्नताम् अनुभवति।

----------------------------------------------------------------

(vi) गङ्गा हिमालयात् निस्सरति।

----------------------------------------------------------------

2. **अधोलिखितवाक्येषु कोष्ठकेषु प्रदत्तानि पदानि योजयित्वा वाक्यानि पुनः लिखन्तु–**

(i) बालः यत् पठति तत् (वि + स्मरति)।

----------------------------------------------------------------।

(ii) प्राचार्यः छात्रान् (उप + दिशति)।

----------------------------------------------------------------।

(iii) मातरम् दृष्ट्वा शिशुः (प्र + सीदति)।.

----------------------------------------------------------------।

(iv) सः पर्वतात् (अव + रोहति)।

----------------------------------------------------------------।

(v) छात्राः क्रीडाक्षेत्रात् (आ + गच्छन्ति)।

----------------------------------------------------------------।

(vi) नृपः सेवकान् (निर् + दिशति)।

----------------------------------------------------------------।

❊❊❊❊❊❊